
# इस्पातनगरी

**(विभक्तिप्रयोग: - पञ्चमीविभक्ति:)**



विश्वप्रसिद्धाम् इत्पातनगरीं को वा न जानाति ? ओडिशाराज्यस्य प्रमुखं स्थानं राउरकेला । एषा एव इस्पातनगरीरूपेण ख्याता । अत्र शंख-कोएलनदीद्वयस्य **संयोगात्** ब्राह्मणीनद्या: उत्पत्ति: भवति । जना: **अस्या: नद्या:** जलं नीत्वा कृषिं कुर्वन्ति । अत्रापि वेदव्यासस्य जन्मस्थली अस्ति इति जनश्रुति: ।एतद् एकं पुण्यक्षेत्रं भवति । एतस्य प्राकृतिकपरिवेश: आकर्षणीय: ।अत्र महत् अरण्यम् आसीत् । क्रमश: अत्र वेदव्यासाश्रम:, पवित्रगोशाला, वैदिकगुरुकुलाश्रम:, संस्कृत-महाविद्यालयद्वयं च स्थापितानि । यानि अस्माकं संस्कृते: प्रचारं प्रसारं च कुर्वन्ति ।

अस्मिन् पुण्यक्षेत्रे १९५४ मिते वत्सरे भारतसर्वकारपक्षत: इस्पात्-शिल्पागारस्य निर्माणम् आरब्धम् । तदा भारतस्य राष्ट्रपति: डॉ. राजेन्द्रप्रसाद: आसीत् । स: ३.२.१९५९ मिते दिनाङ्के शिल्पागारम् उद्घाटितवान् । अस्मात् **शिल्पागारात्** अस्माकं राज्यस्य देशस्य च कृते प्रभूतम् अर्थोपार्जनं भवति । सहस्रं सहस्रं जना: **अस्मात्** वेतनं प्राप्नुवन्ति । तेन परिवारान् पोषयन्ति ।

अत्र हनुमद्वाटिका अस्ति । एषा अतीव मनोहारिणी भूमि: । अत्र सुविशाला हनुमद्मूर्ति: स्थापिता अस्ति । एषा एसिआमहादेशस्य अन्यतमा उच्चमूर्ति: भवति । राउरकेला कलानगरी इति परिचिता । अत्र विभिन्नभाषाभाषिजना: निवसन्ति । एषा गीत-नृत्य-नाटक-चित्रकलाभि: गौरवान्विता ।

अत: एकवारम् इस्पातनगरी अवश्यं द्रष्टव्या ।

**ख्याता, उत्पत्तिम्, स्थापितानि, वत्सरे, आरब्धम्, द्रष्टव्या, प्रभूतम् ।**

## टिप्पणी

**शब्दार्थ: -**

जनश्रुति: - लोककथा (ଲୋକକଥା), आरब्धम् - आरम्भ: अभवत् (ଆରମ୍ଭ ହେଲା), पोषयन्ति - पालनं कुर्वन्ति (ପାଳନ କରନ୍ତି), प्रभूतम् - प्रचुरम् (ପ୍ରଚୁର) ।

1. उच्चैः पठत, लिखत - (अकारान्त - पुंलिङ्गशब्दाः)

**पञ्चमीविभक्तिः**

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| बालक | बालकात् | बालकाभ्यां | बालकेभ्यः |
| देव | ........... | ........... | ........... |
| गज | ........... | ........... | ........... |
| आकाश | ........... | ........... | ........... |
| हस्त | ........... | ........... | ........... |
| मार्ग | ........... | ........... | ........... |

## (आकारान्त - स्त्रीलिङ्ग-शब्दाः)

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| बालिका | बालिकायाः | बालिकाभ्याम् | बालिकाभ्यः |
| पत्रिका | ........... | ........... | ........... |
| मुद्रिका | ........... | ........... | ........... |
| पुस्तिका | ........... | ........... | ........... |
| कथा | ........... | ........... | ........... |

## ईकारान्त-स्त्रीलिङ्ग-शब्दाः

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| नदी | नद्याः | नदीभ्याम् | नदीभ्यः |
| देवी | ........... | ........... | ........... |
| भवती | ........... | ........... | ........... |
| रजनी | ........... | ........... | ........... |
| काशी | ........... | ........... | ........... |
| पुत्री | ........... | ........... | ........... |

## अकारान्त-नपुंसकलिङ्ग-शब्दाः

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| फल | फलात् | फलाभ्याम् | फलेभ्यः |
| जल | ........... | ........... | ........... |
| पत्र | ........... | ........... | ........... |
| गृह | ........... | ........... | ........... |
| द्वार | ........... | ........... | ........... |
| कूल | ........... | ........... | ........... |

## अभ्यासः

१. **योग्यपदेन शून्यस्थानं पूरयत -**

**यथा -** वृक्षात् फलं पतति । (वृक्षः)

(क) भिक्षुकः .................. जलम् आनयति । (नदी)

(ख) शिशुः .................. उत्तिष्ठति । (शय्या)

(ग) बालकः .................. गृहम् आयाति । (विद्यालय)

(घ) अहं .................. आगच्छामि । (संस्कृतकक्षा)

२. **बन्धनीमध्यस्थ-यथार्थपदैः शून्यस्थानं पूरयत -**

**यथा -** वृक्षात् फलं पतति । (वृक्षे, वृक्षात्, वृक्षस्य)

(क) मम भ्राता .................. गृहम् आगच्छति । (राजधान्याः, राजधानीं, राजधान्याम्)

(ख) वानराः .................. फलानि खादन्ति । (वृक्षम्, वृक्षे, वृक्षात्)

(ग) महिलाः .................. जलम् आनयन्ति । (नद्यः, नद्याः, नद्याम्)

(घ) सर्पः .................. विभेति । (नकुलस्य, नकुलात्, नकुलम्)

३. **उचितेन पदेन शून्यस्थानं पूरयत -**

(क) ओडिशाराज्यस्य ...................... स्थानं राउरकेला ।

(ख) अत्र शंख-कोएलनदीद्वयस्य ...................... ब्राह्मणीनद्याः उत्पत्तिः ।

(ग) अत्र महत् ...................... आसीत् ।

(घ) यानि अस्माकं ...................... प्रचारं प्रसारं च कुर्वन्ति ।

(ङ) राउरकेला ...................... परिचिता ।

४. **उदाहरणं दृष्ट्वा प्रश्नान् लिखत -**

(क) ओडिशाराज्यस्य प्रमुखं स्थानं राउरकेला ।

प्रश्न : **कस्य** प्रमुखं स्थानं राउरेकला ?

(ख) एषा एव इस्पातनगरीरूपेण ख्याता ।

प्र.......................................................................................... ?

(ग) अस्याः नद्याः जलं नीत्वा कृषिं कुर्वन्ति ।

प्र.......................................................................................... ?

(घ) अत्र महत् अरण्यम् आसीत् ।

प्र.......................................................................................... ?

(ङ) तदा भारतस्य राष्ट्रपतिः डॉ. राजेन्द्रप्रसादः आसीत् ।

प्र.......................................................................................... ?

(च) अत्र हनुमद्वाटिका अस्ति ।

प्र.......................................................................................... ?

(छ) सहस्त्रं सहस्त्रं जनाः अस्मात् वेतनं प्राप्नुवन्ति ।

प्र.......................................................................................... ?

(ज) एषा अतीव मनोहारिणी पवित्रभूमिः च ।

प्र.......................................................................................... ?

५. **मातृभाषया अनुवादं कुरुत -**

(क) विश्वप्रसिद्धाम् इस्पातनगरीं को वा न जानाति ?

..........................................................................................

(ख) अत्रापि वेदव्यासस्य जन्मस्थली अस्ति ।

..........................................................................................

(ग) एतस्य प्राकृतिकपरिवेशः आकर्षणीयः ।

..........................................................................................

(घ) सहस्त्रं सहस्त्रं जनाः अस्मात् वेतनं प्राप्नुवन्ति ।

..........................................................................................

(ङ) तेन परिवारान् पोषयन्ति ।

..........................................................................................

(च) अत्र हनुमद्वाटिका अस्ति ।

..........................................................................................

(छ) अत्र सुविशाला हनुमद्मूर्तिः स्थापिता अस्ति ।

..........................................................................................

(ज) राउरकेला कलानगरी इति परिचिता ।

..........................................................................................

(झ) अत्र विभिन्नभाषाभाषिजनाः निवसन्ति ।

..........................................................................................

(ट) अतः एकवारम् इस्पातनगरी अवश्यं द्रष्टव्या ।

..........................................................................................

**६. विक्षिप्तवर्णाः सन्ति शुद्धं शब्दं रचयत -**

यथा - र ए क म् वा - एकवारम्

(क) न री इ त स्पा ग - ......................................

(ख) वा नि नः सि - ......................................

(ग) ला रा के उ र - ......................................

(घ) ता प चि रि - ......................................

(ङ) ली ज न्म स्थ - ......................................

(च) सः वे द व्या - ......................................

(छ) स्य त भा र - ......................................

(ज) णि स ह स्रा - ..........................................

(झ) सा रा जे न्द्र प्र द: - ..........................................

७. **स्तम्भद्वयं योजयत ।**

| **'क'** | **'ख'** |
|---|---|
| अस्या: | राष्ट्रपति: |
| भारतस्य | नद्या: |
| एकं | भूमि: |
| मनोहारिणी | अरण्यम् |
| परिवारान् | पुण्यक्षेत्रम् |
| महत् | पोषयन्ति |

८. **संशोधनं कुरुत ।**

(क) जना: <u>अस्य</u> नद्या: जलं नीत्वा कृषिं कुर्वन्ति ।

(ख) एतद् <u>एका</u> पुण्यक्षेत्रं भवति ।

(ग) सहस्रं सहस्रं जना: <u>अस्मिन्</u> वेतनं प्राप्नुवन्ति ।

(घ) अत्र विभिन्न भाषाभाषिजना: <u>निवसति</u> ।

(ङ) अत: एकवारम् इस्पातनगरी अवश्यं <u>द्रष्टव्यम्</u> ।

•